कृतोपवासः शुचिरप्रमत्तः
संपूजयेद्भक्तिनम्रो गणेशम् ॥”
इति प्रायश्चित्ततत्त्वम् ॥
संयत्वरः, पुं, वाग्यतः। जन्तुसमूहः। इति संक्षिप्तसारोणादिवृत्तिः ॥
संयद्वरः, पुं. (संयच्छतीति। सं + यम + छित्वर-च्छत्वरेति। उणा० ३। १। इति ष्वरच्प्रत्ययेन साधु।) नृपः। इत्युणादिकोषः ॥
संयन्ता, [ऋ] त्रि संयमनकर्त्ता। नियन्ता। संपूर्व्वयमधातोस्तृन्प्रत्ययेन निष्पन्नः ॥ (यथा, महाभारते। ४। ६२। ४८।
“तं विसंज्ञमपोवाह संयन्ता रथवाजिनाम्।
उपदेशमनुस्मृत्य रक्षमाणो महारथम् ॥”)
संयमः,पुं. (सं + यम + “यमः समुपनिविषु च।” ३।३। ६३। इति अप्।) व्रताद्यङ्गपूर्व्वदिनकर्त्तव्याचारः। तत्पर्य्यायः। वियामः २ वियमः ३ यामः ४ यमः ५ संयामः ६। इत्यमरः ॥ संयमनम् ७ नियमः ८ इति धरणिः ॥ तद्विधानं यथा। अथ दशमीनियमाः। स्मृतिसन्तोषे।
“कांस्यं मांसं मसूरञ्च चणकं कोरदूषकम्।
शाकं मधु परान्नञ्च त्यजेदुपवसन् स्त्रियम् ॥”
अत्रोपवसन्निति तद्दिने भोजनासम्भवात् सामीप्यात् पूर्व्वापरदिनयोर्ग्रहणम्। स्मृतिः।
“शाकं माषं मसूरञ्च पुनर्भोजनमैथुने।
द्युतमत्यम्बुपानञ्च दशम्यां वैष्णवस्त्यजेत् ॥
कांस्यं मांसं सुरां क्षौद्रं लोभं वितथभाषणम्।
व्यायामञ्च व्यवायञ्च दिवास्वप्नं तथाञ्जनम् ॥
तिलपिष्टं मसूरञ्च दशम्यां वर्ज्जयेत् पुमान्।
दशम्यामेकभक्तञ्च कुर्व्वीत नियतेन्द्रियः ॥
आचम्य दन्तकाष्ठञ्च खादेत तदनन्तरम्।
पूर्व्वं हरिदिनाल्लोकाः सेवध्वं चैकभोजनम् ॥
अवनीपृष्ठशयनाः स्त्रियाः सङ्गविवर्जिताः।
सेवध्वं देवदेवेशं पुराणं पुरुषोत्तमम्।
सकृद्भोजनसंयुक्ता द्वादश्याञ्च भविष्यथ ॥”
इत्येकादशीतत्त्वम् ॥*॥
श्राद्धपूर्व्वदिनकर्त्तव्यनियमो यथा। देवलः।
“श्वः कर्त्तास्मीति निश्चित्य दाता विप्रान्निमन्त्रयेत्।
निरामिषं सकृत् भुक्त्वा सर्व्वसुप्तजने गृहे।
असम्भवे परेद्युर्व्वा ब्राह्मणांस्तान्निमन्त्रयेत् ॥”
वराहपुराणम्।
“वस्त्रशौचादि कर्त्तव्यं श्वः कर्त्तास्मीति जानता।
स्नानोपलेपनञ्चैव कृत्वा विप्रान्निमन्त्रयेत्।
दन्तकाष्ठञ्च विसृजेत् ब्रह्मचारी शुचिर्भवेत् ॥”
विसृजेत् श्राद्धीयब्राह्मणेभ्यो दद्यात्। मार्कण्डेयपुराणम्।
“निमन्त्रयेच्च पूर्व्वेद्युः पूर्व्वोक्तान् द्विजसत्तमान्।
अप्राप्तौ तद्दिने वापि हित्वा योषित्प्रसङ्गिनम् ॥”
यमः।
“प्रार्थयेत् प्रदोषान्ते भुक्तान्नं शयितान् द्विजान्।
सर्व्वायासविनिर्मुक्तैः कामक्रोधविवर्ज्जितैः ॥
भवितव्यं भवद्भिश्च श्वोभूते श्राद्धकर्म्मणि।
दक्षिणं जानु चालभ्य त्वं मयात्र निमन्त्रितः।
एवं निमन्त्र्य नियमान् श्रावयेत् पैतृकान्बुधः॥”
तन्नियममाह।
“अक्रोधनैः शौचपरैः सततं ब्रह्मचारिभिः।
भवितव्यं भवद्भिश्च मया च श्राद्धकर्म्मणि ॥”
इति श्राद्धतत्त्वम् ॥*॥
तीर्थयात्रापूर्व्वदिनकर्त्तव्यनियममाह। ब्रह्मपुराणम्।
“यो यः कश्चित्तीर्थयात्रान्तु गच्छेत्
सुसंयतः स च पूर्व्वं गृहे स्वे।
कृतोपवासः शुचिरप्रमत्तः
संपूजयेद्भक्तिनम्रो गणेशम् ॥
देवान् पितॄन् ब्राह्मणांश्चैव साधून्
धीमान् प्रीणयन् वित्तशक्त्या प्रयत्नात्।
प्रत्यागतश्चापि पुनस्तथैव
देवान् पितॄन् ब्राह्मणान् पूजयेच्च ॥”
एवं प्रकुर्व्वतस्तस्य तीर्थाद्यदुक्तं फलं तत् स्यान्नात्र सन्देह एव। सुसंयतः पूर्व्वदिने कृतैकभक्तादिनियमस्तदुत्तरदिने कृतोपवास इत्यादि। उपवासदिने मुण्डनमपि।
“प्रयागे तीर्थयात्रायां पितृमातृवियोगतः।
कचानां वपनं कार्य्यं वृथा न विकचो भवेत् ॥”
इति विष्णुपुराणात्। इति प्रायश्चित्ततत्त्वम् ॥
प्रायश्चित्तपूर्व्वाहकृत्यं यथा। शङ्खलिखितौ।
“वाप्य केशनखान् पूर्व्वं घृतं प्राश्य वहिर्निशि
प्रत्येकं नियतं कालमात्मनो व्रतमादिशेत् ॥”
इति प्रायश्चित्ततत्त्वम् ॥
(बन्धनम्। यथा, साहित्यदर्पणे। ३। १५५।
“कापि कुन्तलसंव्यानसंयमव्यपदेशतः।
बाहुमूलं स्तनौ नाभिपङ्कजं दर्शयेत् स्फुटम् ॥”
संकोचः। यथा, मार्कण्डेये। ७७। ४।
“मयि दृष्टे सदा यस्मात् कुरुषे नेत्रसंयमम्।
तस्माज्जनिष्यते मूढ़े प्रजासंयमनं यमम् ॥”)
संयमकः,त्रि, (संयच्छतीति। सं + यम् + ण्वुल्।) नियन्ता। यथा,—
“स एव धाता सर्व्वस्य तन्नियोगकरा वयम्।
यमसंयमने त्वक्तः सोऽस्मत्संयमको हरिः ॥”
इति वह्निपुराणे नारसिंहप्रादुर्भावाध्यायः ॥
संयमी च ॥
संयमनं, क्ली, (सं + यम + ल्युट्।) बन्धनम्। (यथा, साहित्यदर्पणे। ६। ३१८।
“यथावा वेण्यां द्रौपदीकेशसंयमनहेतुर्भीमसेनक्रोधापचितो युधिष्ठिरोत्साहः ॥”) व्रतम्। इति मेदिनी ॥ चतुःशालम्। इति सञ्ज्ञवनशब्दटीकायां भरतः ॥ (यमगृहम्। यथा, महाभारते। २। १६३। ८।
“एतत् संयमनं पुण्यमतीवाद्भुतदर्शनम्।
प्रेतराजस्य भवनमृद्ध्या परमया युतम् ॥”
शासनम्। दमनम्। यथा,भागवते।१०।१६।६।
“तं चण्डवेगविषवीर्य्यमवेक्ष्य तेन।
दुष्टां नदीञ्च खलसंयमनावतारः ॥”*॥
संयच्छतीति। सं + यम + ल्युः। नियन्तरि, त्रि। यथा, मार्कण्डेये। ७७। ४।
“तस्माज्जनिष्यते मूढ़े प्रजासंयमनं यम् ॥”)
संयमनी, स्त्री. (संयम्यतेऽस्यामिति। सं + यम् + अधिकरणे ल्युट्।) यमपुरी। इति मेदिनी ॥ (यथा, भागवते। १०। ४५। ४२।
“ततः संयमनीं नाम यमस्य दयितां पुरीम्।
गत्वा जनार्द्दनः शङ्खं प्रदध्मौ सहलायुधः ॥”)
संयमितः, त्रि, जातसंयमः। संयमशब्दात् इतोऽस्य जाते इत्यनेन इतप्रत्ययेन निष्पन्नः ॥
संयमी, [न्] पुं, (संयमोऽस्यास्तीति। संयम + इनिः।) मुनिः। इति धरणिः ॥ निगृहीतेन्द्रिये, त्रि। यथा,—
“या निशा सर्व्वभूतानां तस्यां जागर्त्ति संयमी
यस्यां जाग्रति भूतानि सा निशा पश्यतो मुनेः॥”
इति श्रीभगवद्गीतायाम् २ अध्यायः ॥
संयात्रा, स्त्री, द्वीपान्तरगमनम्। संपूर्व्वो यातिर्द्वीपान्तरगमनवृत्तिस्ततस्त्रासुसिति त्रः स्त्रियामाप् संयात्रा। द्वीपान्तरगमनं सम्यग्यात्रा संयात्रा वा। इति सांयात्रिकशब्दटीकायां भरतः ॥
संयानं,क्ली, सम्यग्गमनम्। संपूर्व्वयाधातोरनट् (ल्युट्) प्रत्ययेन निष्पन्नम् ॥ (यथा, महाभारते। ३। १९। ५।
“स त्वं सात्वतमुख्याद्य लब्धसंज्ञो यदृच्छया।
पश्य मे हयसंयाने शिक्षां केशवनन्दन ॥”
प्रेतनिर्हारः। यथा, रामायणे। १। ७६। २।
“अलं शोकेन भद्रं ते राजपुत्र महायशः।
प्राप्तकालं नरपतेः कुरु संयानमुत्तमम् ॥”)
संयामः,पुं,(सं + यम + “यमः समुपनिविषु च।” ३। ३। ६३। इति पक्षे घञ्।) संयमः। इत्यमरः ॥
संयावः पुं, (सं + यु + “समि युद्रुदुवः।” ३।३। २३। इति घञ्।) घृतक्षीरादिपक्वगोधूमः। यथा,—
“संयावस्तु घृतक्षीरगुड़गोधूमपाकजः।”
इति शब्दचन्द्रिका ॥
पिष्टकविशेषः। पेराकी इति भाषा। यथा,—
“पट्टिकाः साज्यसमिता निर्म्मिता घृतभर्ज्जिताः
कुट्टितायालिताः शुद्धाः शर्कराभिर्व्विमर्द्दिताः॥
तच्चूर्णे प्रक्षिपेदेलां लवङ्गमरिचानि च।
नारिकेलं सकर्पूरं चारबीजान्यनेकशः ॥
घृताक्तसमितापुष्टरोटिका रचिता ततः।
तस्यां तत्पुरणात्तस्य कुर्य्यान्मुद्रां दृढां सुधीः॥
सर्पिषि प्रचुरे तान्तु सुपचेन्निपुणो जनः।
प्रकारज्ञैः प्रकारोऽयं संयाव इति कीर्त्तितः।
मण्डकोऽपि समो ज्ञेयः संयावोऽपि गुणैर्जनैः॥”
इति भावप्रकाशः ॥
संयुक् [ज्] त्रि, (सं + युज् + क्विप्।) गुणवान्। यथा,—
“सम्बन्धी गुणवान् संयुक् मित्रयुङ्मित्रवत्सलः।”
इति त्रिकाण्डशेषः।